अधस्ततः सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये वड़वानलश्च ।
कुवृत्तपादान्तरितानि तानि
स्थानानि षड्गोलविदो वदन्ति ॥"

अपि च ।

"यल्लङ्कोज्जयनीपुरोपरिकुरुक्षेत्रादिदेशान् स्पृशन्
सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः ।
आदौ प्रागुदयोऽपरत्र विषये पश्चाद्धि रेखोदयात्
स्यात्तस्मात् क्रियते तदन्तरभुवं खेटेष्वृणं स्वं फलम् ॥"
इति सिद्धान्तशिरोमणिः ॥ * ॥

अथ लङ्कापुरीवर्णनम् ।

त्वष्टोवाच ।

"त्रिंशद्योजनविस्तीर्णा स्वर्णप्राकारतोरणाम् ।
दक्षिणस्योदधेस्तीरे त्रिकूटो नाम पर्व्वतः ।
शिखरे तस्य शैलस्य मध्यमम्बुधिसन्निधौ ॥
पतत्त्रिभिश्च दुष्प्रापां टङ्कच्छिन्नां चतुर्द्दिशम् ।
शक्रार्थं मत्कृता पूर्व्वं प्रयत्नात् बहुवत्सरैः ॥
वसन्तु तत्र दुर्द्धर्षाः सुखं राक्षसपुङ्गवाः ।
अमरावतीं समासाद्य सेन्द्रा इव दिवौकसः ॥
लङ्कादुर्गं समासाद्य शत्रूणां शत्रुसूदनाः ।
दुराधर्षा भविष्यन्ति राक्षसैर्ब्बहुभिर्व्वृताः ॥"
इति वह्निपुराणे कपिलदर्शननामाध्यायः ॥ * ॥

शाखा । शाकिनी । कुलटा । इति मेदिनी । के, ३३ ॥ धान्यविशेषः । तत्पर्य्यायः । करालत्रिपुटा २ काण्डिका ३ रूक्षणात्मिका ४ । अस्या गुणाः । रुच्यत्वम् । हिमत्वम् । गौल्यत्वम् । पित्तनाशित्वम् । वातकारित्वम् । गुरुत्वञ्च । इति राजनिर्घण्टः ॥

लङ्कादाही, [ न् ] पुं, ( लङ्कां दहति तच्छीलः । दह + णिनिः । ) हनूमान् । इति शब्दरत्नावली ॥

लङ्काधिपतिः, पुं; ( लङ्काया अधिपतिः । ) रावणः । इति जटाधरभूरिप्रयोगौ ॥ ( यथा, रघुः । ६ । ६२ ।

"पुरा जनस्थानविमर्द्दशङ्की
सन्धाय लङ्काधिपतिः प्रतस्थे ॥" )

लङ्कापतिः, पुं, ( लङ्कायाः पतिः । ) रावणः । इति भूरिप्रयोगः ॥

लङ्कापिका, लङ्कायिका, लङ्कारिका } स्त्री, एका । इति शब्दरत्नावली ॥ पिड़िंशाक इति भाषा ॥

लङ्कास्थायी, [ न् ] पुं, ( लङ्कावत् तिष्ठतीति । स्था + णिनिः । ) वृक्षविशेषः । लङ्कासिज इति भाषा । यथा,—

"लङ्कास्थायी राजवृक्षो भद्रचूड़ो विशायकः ।"
इति शब्दचन्द्रिका ॥

( लङ्कायां तिष्ठतीति । ) लङ्कावासिनि, त्रि ॥

लङ्केशः, पुं, ( लङ्काया ईशः पतिः । ) रावणः । इति त्रिकाण्डशेषः ॥

लङ्कोपिका, स्त्री, एका । इति शब्दरत्नावली ॥

लङ्कोयिका, स्त्री, एका । इति शब्दरत्नावली ॥

लङ्गः, पुं, ( लङ्गतीति । लङ्ग गतौ + अच् । ) सङ्गः । विड्गः । इति मेदिनी । गे, २३ ॥ नां इति भाषा ॥

लङ्गूलं, क्ली, लाङ्गूलम् । इत्युणादिकोषः ॥

लङ्घनं, क्ली, ( लङ्घ + ल्युट् । ) उपवासः । (यथा, सुश्रुते । १ । ४६ ।

"तत्रामे लङ्घनं कार्य्यं विदग्धे वमनं हितम् ।
विष्टब्धे स्वेदनं पथ्यं रसशेषे शयीत च ॥"
यथा च ।
"लङ्घनं बृंहणं काले रूक्षणं स्नेहनन्तथा ।
स्वेदनं स्तम्भनञ्चैव जानीते यः स वै भिषक् ॥"
"तदग्निवेशस्य वचो निशम्य गुरुरब्रवीत् ।
यत्किञ्चिल्लाघवकरं देहे तल्लङ्घनं स्मृतम् ॥"
"लघूष्णतीक्ष्णविषदं रूक्षं सूक्ष्मं खरं सरम् ।
कठिनञ्चैव यद्द्रव्यं प्रायस्तल्लङ्घनं स्मृतम् ॥"
"——————पिपासा मारुतातपौ ।
पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् ॥"
"प्रभूतश्लेष्मपित्तास्रमलाः संसृष्टमारुताः ।
बृहच्छरीरा बलिनो लङ्घनीया विशुद्धिभिः ॥"
"त्वग्दोषिणां प्रमीढ़ानां स्निग्धाभिष्यन्दिबृंहिनाम् ।
शिशिरे लङ्घनं शस्तमपि वातविकारिणाम् ॥"
इति चरके सूत्रस्थाने द्वाविंशेऽध्याये ॥
"ज्वरे लङ्घनमेवादावुपदिष्टमृते ज्वरात् ।
क्षयानिलभयक्रोधकामशोकश्रमोद्भवात् ॥
आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधापयन् ।
विदधाति ज्वरं दोषस्तदा लङ्घनमाचरेत् ॥
अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम् ।
ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारकम् ॥
प्राणाविरोधिना चैनं लङ्घनेनोपपादयेत् ।
बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रमः ॥
तत्तु मारुतक्षुत्तृष्णासुखशोषभ्रमान्विते ।
कार्य्यं न बाले वृद्धे वा न गर्भिण्यां न दुर्ब्बले ॥
वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे ।
हृदयोद्गारकण्ठास्यशुद्धौ तन्द्रा क्लमे गते ॥
स्वेदे जाते रुचौ चापि क्षुत्पिपासासहोदये ॥
कृतं लङ्घनमादेश्यं निर्व्यथे चान्तरात्मनि ॥
पर्व्वभेदोऽङ्गमर्द्दश्च कासः शोषो मुखस्य च ।
क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्ब्बल्यं श्रोत्रनेत्रयोः ॥
मनसः सम्भ्रमोऽभीक्ष्णमूर्द्ध्ववातस्तमो हृदि ।
देहाग्निबलहानिश्च लङ्घनेऽतिकृते भवेत् ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥ )

क्रमणम् । ( यथा, कुमारे । ५ । ६४ ।

"यथा श्रुतं वेदविदांवर त्वया
जनोऽयमुच्चैः पदलङ्घनोत्सुकः ।
तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते ॥" )

प्लवनम् । इति मेदिनी । ने, १२० ॥ अग्निलङ्घननिषेधो यथा,—

"न चाग्निं लङ्घयेद्धीमान्नोपदध्यादधः क्वचित् ।
न चैनं पादतः कुर्य्यात् मुखेन न धमेद्बुधः ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥

( व्यतिक्रमः । यथा, महाभारते । १ । १५६ । ३६ ।

"न चाप्यधर्म्मः कल्याण बहुपत्नीकता नृणाम् ।
स्त्रीणामधर्म्मः सुमहान् भर्त्तुः पूर्व्वस्य लङ्घने ॥" )

अभ्यन्तरीयगतिः । यथा,—

"श्रुतम्नु लङ्घनं पश्चिमाङ्गगलशुद्धारकम् ।"
इति हेमचन्द्रः ॥ * ॥

( स्त्री, अवमानना । यथा, मार्कण्डेये । १३५ । ३३ ।

"अन्यस्यापि स्ववंशस्य लङ्घना क्रियते ह्रिया ।
तां नालं क्षत्त्रियः सोढुं किं पुनः पितृमारणम् ॥" )

लछ, लक्ष्मणि । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) लछति वृषं चक्रेण गोपः । इति दुर्गादासः ॥

लज, भर्त्से । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) लजति । इति दुर्गादासः ॥

लज, इ भर्त्से । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) इ, लञ्जति । इति दुर्गादासः ॥

लज, इ क भाषद्वार्थे । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-अक०-सक०च-सेट् । ) इ क, लञ्जयति । भा दीप्तिः षड्डार्थो निकेतनहिंसाबलदानानि । इति दुर्गादासः ॥

लज, क अन्तर्द्धौ । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-सक०-सेट् । ) अन्तर्द्धिराच्छादनम् । क, लाजयति चन्द्रं मेघः । इति दुर्गादासः ॥

लज, ङ व्रीड़े । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-अक०-सेट् । ) ङ, लजते । निष्ठायां लग्न इत्यन्ये । इति दुर्गादासः ॥

लज, त् क भासने । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-अक०-सेट् । ) क, लजयति । भासनं दीप्तिः । इति दुर्गादासः ॥

लजकारिका, स्त्री, ( लजं लज्जां करोतीव । कृ + ण्वुल् । टापि अत इत्वम् । ) लज्जालुलता । इति शब्दमाला ॥

लज्जा, स्त्री, ( लज्जनमिति । लस्ज व्रीड़ने + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः । टाप् । ) अन्तःकरणवृत्तिविशेषः । इति नागोजीभट्टः ॥ अकर्त्तव्ये कर्म्मणि परज्ञानभयम् । लाज् इति भाषा । तत्पर्य्यायः । मन्दाक्षम् २ ह्रीः ३ त्रपा ४ व्रीड़ा ५ । सा अन्यतश्चेत् अपत्रपा ६ । इत्यमरः ॥ मन्दास्यम् ७ लज्या ८ व्रीड़ः ९ व्रीड़नम् १० । इति शब्दरत्नावली ॥ ( यथा, कुमारे । १ । ४८ ।

"लज्जा तिरश्चां यदि चेतसि स्या-
दसंशयं पर्व्वतराजपुत्त्र्याः ।
तं केशपाशं प्रसमीक्ष्य कुर्य्यु-
र्वालप्रियत्वं शिथिलं चमर्य्यः ॥" )

लज्जालुः । इति राजनिर्घण्टः ॥